N.A.

Panchalakshana patrika

पंचलक्षण पत्रिका

Paper- Handwritten

N.A. (very old)

9 Folio

Sanskrit

14.8'x4.8"

Incomplete

१०६३ - नं ६३

125

F-11

पंचलक्षण पत्रिका

स्वशेषणे। विधि। निषेधा। विशेषणमुपसंक्रमते। सति विशेष्ये बाधे यथा शिखी ध्वात इत्यादि। १ विपरीतकोटि उद्भावकपरजिगीषयान्यायप्रयोगो विचारः। विवाद

श्रीगणेशाय नमः। अनुमानं निरूप्य न्यायतदवयवनिरूपणं प्रतिजानीते। मूले तच्चेति तत् निरुक्तमनुमानं परार्थं विचारदशायां मध्यस्थस्य विषयसाध्यनिश्चयरूपप्रयोजनसाधनं न्यायसाध्यमिति। न्यायप्रयोज्यमित्यर्थः। वादिप्रयुक्तन्यायजन्यशाब्दबोधेन मध्यस्थस्य चरमकारणलिङ्गपरामर्शरूपानुमानजननादिभावः। ज्ञायमानलिङ्गस्यानुमानहेतुत्वं तद्विशेषणस्य परामर्शस्य न्यायाधीनत्वान्न द्विरुक्तस्यतत्त्वमित्यवधेयम्। अथवानुमानं अनुमितिः परार्थं मध्यस्थस्य साध्यसंशयनिवृत्तिरूपप्रयोजनसाधनं परस्य प्रतिवादिनः अर्थो निवृत्तिर्यस्मादिति तादृशानुमितिर्वा। एतेन तन्निरूपणपदप्रयोजनमुपदर्शितं। न्यायप्रयोगद्वारा मध्यस्थानुमिती+रेव न्यायज्ञानप्रयोजनत्वात् कारणत्वं स्मरणप्रयोजकसंबंधकथनेन प्रसंगो वा संगतिरपि दर्शिता। समस्तरूपेति पक्षसत्त्वादिरूपपंचकैः उपनयेन पक्षसत्त्वस्य उदाहरणेन व्याप्तिघटकसपक्षसत्त्वयोर्निगमनेनाबाधितत्वासत्प्रतिपक्षितत्वयोः प्रतिपादनात् तल्लक्षणसमन्वयः। अत्रैवेति समस्तरूपोपपन्नं लिङ्गमित्यत्रैवेत्यर्थः। अतिव्याप्तेरिति – मुपलक्षणं उदाहरणादिर्मात्रिकस्य न्यायत्वापत्तिरिष्टव्या। अनुमितेर्निश्चरमकारणं यो लिंगपरामर्शः व्याप्तिप्रकारेण पक्षे यल्लिंगज्ञानं तत्प्रयोजकं यच्छाब्दज्ञानं तज्जनकवाक्यमित्यर्थः। तत्र प्रयोजकोऽत्र प्रतिज्ञादिसकलावयवजन्यमहावाक्यार्थबोधस्य तावदर्थगोचरसमूहालंबनबोधस्य वा परिचायकमात्रं न तु परामर्शप्रयोजकत्वेन शाब्दज्ञानस्य लक्षणघटकता किं तु तावदर्थविषयकबोधत्वेनैव अतोऽभेदेनवानीत उपनयवाक्यमात्रजन्यापि बुद्धेः रूपनयकज्ञानत्वलक्षणप्रत्यासत्तिविधया मानसपरामर्शप्रयोजकतया तत्रातिव्याप्तिरिति निरस्ता तादृशयत्किंचिच्छाब्दबोधं प्रति यादृशयादृशघटकमिति का

+ अनुमिती

+ पर्वत इत्याद्यु

+न्यायघटकेयरमवर्णजन्यकेऽतिव्याप्तिवारणायपर्यवसानं

•मा॥टी॥अ ज्ञानत्वेनशाब्दज्ञानस्यकारणताप्रत्येकंतत्तद्धर्मावच्छिन्नवाक्यसमुदायत्वस्यतादृशयत्किंचिच्छाब्दबोधनिरूपितशाब्दज्ञाननिष्ठयायाकारणतातावदवच्छेदककोटि

१ प्रविष्टयत्किंचिज्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वपर्यवसितस्यविवक्षितत्वान्नास्माकंन्यायैकदेशेऽतिव्याप्तिः।नादृशधर्मश्चप्रतिज्ञादीनांआ

नुपूर्वीविशेषाएव॥पर्वतीयवह्निमान्धूमाकारकबोधेपर्वतोवह्निमान्पर्वतोदृष्टनवानित्याकारकविविधानुपूर्वीप्रकारकज्ञानानामेवहेतुतयातच्चा

विधैकैकानुपूर्व्यवच्छिन्नवाक्यपंचकस्यन्यायत्वानुपपत्तिरतोयत्किंचिच्छाब्दबोधनिवेशः।समानानुपूर्वीकनानावाक्यविषयतानामेवानुमतरूपे

णैककारणतावच्छेदकत्वात्सर्वतावह्निमानित्याद्यैकैकवाक्यव्यक्तिघटितवाक्यपंचकवृत्तिसमुदायत्वस्यतादृशकारणतावच्छेदकविषयताश्रयवर्ण

त्वव्यापकत्वमितियत्किंचिज्ज्ञानीयविषयताश्रयनिवेशः।नचवाक्यान्तरसाधारणसमुदायत्वमादायवाक्यान्तरघटितसमुदायेऽतिव्याप्तिरितिवाच्यं।तादृशस

मुदायत्वादेःन्यूनवृत्तित्वानिरूपकत्वं यदिस्वसमानाधिकरणस्वावच्छिन्नभिन्नवृत्तित्वोभयसंबंधेनतादृशसमुदायत्वविशिष्टान्यत्वं तदाएकैकन्यायघटक

प्रतिज्ञादिवाक्यसमुदायेनातिव्याप्तिर्न्कगती।अथचरकैकन्यायघटकप्रतिज्ञावाक्यवृत्तितादृशसमुदायत्वमादायासंभवः।अतःस्वाभाववद्वृत्तित्वस्वस

मानाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयसंबंधेनस्वविशिष्टयत्तादृशसमुदायत्वंतत्कपत्वं तन्निष्ठभिन्नत्वं अनिरूपकत्वांगपरिष्कारः।प्रथमस्वपदेनवाक्यां

तरघटितन्यायवृत्तिसमुदायत्वंतद्विशिष्टन्यायवृत्तिन्यायवृत्तिसमुदायत्वमितिसर्वत्रनदोषः।तेनतन्निरूक्तसमुदायत्वस्याविवक्षणीयत्वात्।नचैवमविमुक्तमप्र १

पुक्तप्रतिज्ञादिसमुदायेऽतिव्याप्तिनादवस्थस्य इति वाच्यं। व्युत्क्रमप्रयुक्तप्रतिज्ञादिवृत्तियद्यत्समुदायत्वं तावद्भेदकूटेन निरुक्तसमुदायत्वस्यैव विशेषणीयत्वात् न
चैवं एकैकन्यायघटकयत्प्रतिज्ञादिवाक्यं तत्समुदायेऽतिव्याप्तिरिति वाच्यं। स्वाश्रयीभूतन्यायकिंप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तदन्य
त्वस्य समुदायत्वे विशेषणीयत्वादिति दिक्। न्यायजन्यबोधस्य परामर्शप्रयोजकत्वांशे गमयति। प्रतिज्ञादीति। एकवाक्यतयेति। विशेषणे तृतीया। तथा चैकवाक्य
तापन्नैरित्यर्थः। एकवाक्यत्वं च। विशिष्टैकार्थप्रतिपत्तिपरत्वं। तदुत्थाप्याकांक्षानिवर्तकत्वं तन्निर्वर्तनीयाकांक्षोत्थापकत्वान्यतरत्वेन वा। तेन पंचवाक्य
जन्यमहावाक्यार्थबोधासंभवेऽपि न क्षतिः। स्वार्थविशिष्टज्ञानं तत्तद्वाक्यार्थविषयकं ज्ञानं तच्च समूहालंबनमन्यथैवेत्यन्यदेतत्। विशिष्टवैशिष्ट्यावगा
हिमानांतरं। विशिष्टवैशिष्ट्यावगाहिबोधात्मकपरामर्शजनकं मानं। उत्थाप्यते। स्वात्मकसइत्याकारसंपन्नीक्रियते तेन तथाविधेन मनसा परामर्श उत्पा
द्यत इत्युपाध्यायः। अत्र च तदेव ज्ञानं परामर्शरूपं उपनयार्थविषयकत्वादित्याक्षिप्य उपनयस्य व्याप्त्यंशेन तात्पर्यं तच्चासति न्यायजन्यबोधे उदाहरणा
र्थतया उपनयार्थतयापि व्याप्तिज्ञाने पौनरुक्त्यं स्यात्। किंतु पक्षधर्मत्वमेवोपनयेन विवक्षितं। तथा च उदाहरणार्थव्याप्तेरुपनयार्थपक्षधर्मतायाश्चावि
शृंखलमेव भानमिति न न्यायजन्यशब्दबोधस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहिता व्याप्यः पक्षे वं तेन नवेत्याकांक्षानुरोधेन वह्निव्याप्यादिपदघटितोपन
यवाक्यं प्रयुज्यत इति समाहितवान्। अग्रे दर्शयिष्यते। यदि व्याप्तिविशिष्टपक्षधर्मत्वमाकांक्षितं। तदा व्याप्तिविशिष्टविषयकबोधस्तादृशाकांक्षानिवर्त

मा॰टि॰ज॰
२

पिच्यतीति तच्चावैधबोधे एव उपजमतात्पर्यभावस्यकं। न चैवमप्याकांक्षानिवर्तयि अवान्तरवाक्यार्थबोधस्यव्या। तौ विशिष्टवैशिष्ट्यावगाहित्वापगमेऽपिन्या
यजन्यमहावाक्यार्थबोधे उपजयाद्वया। तीज्ञानं तोपेयते उदाहरणे द्वेवतत्र तद्दानान् अवान्तरवाक्यार्थधियः परामर्शरूपत्वेऽपि निगमनजन्या बाधित
त्वादि प्रतिपत्तेरनुमितावपेक्षितत्वान्नावत्पर्यन्तं तदसत्वेन परामर्शान्तरस्यापेक्षेतिवाच्यं। अवान्तरवाक्यार्थबोधेऽप्यापत्तिज्ञानानुरोधेन तदंशेऽप्युपनयतात्पर्य
कल्पनाया आवश्यकत्वे महावाक्यार्थबोधे तद्दानेऽपि बाधकाभावादिति। न्यायजन्य वाक्यस्य वादिवाक्यजन्यत्वेनाप्रामाण्यशंका कर्तुं कितनतयाऽ ज्ञान
नुमित्यजनकतया परामर्शान्तरस्वीकार इति मिश्राः। नव्यास्तु पक्षांशेऽव्याप्तौ विशिष्टहेतुवैशिष्ट्यावगाहिज्ञानमेवानुमितिहेतुर्न तु व्याप्तिविशिष्टहे
तुमद्देशे ज्ञानं। तादृशवैशिष्ट्यावगाहितानन्यायजन्यायाः शाब्दबुद्धेः नामार्थयोर्भेदान्वयबोधस्याव्युत्पन्नत्वाद् तव्याप्यव्यावच्छिन्नइतुनिष्टप्रकारे
ताकबोधे हेतुविशेष्यकव्याप्तिरूपविशेषणतावच्छेदकप्रकारकमानसज्ञानान्मानस एव तादृशपरामर्शोऽवश्यं स्वीकर्तव्य इत्यभिप्रायेण तेन चेत्याद्य
भिहितं। विशिष्टवैशिष्ट्यावगाहिमानान्तरं च विशिष्टवैशिष्ट्यावगाहिबोधजनकं विशेषणतावच्छेदकीभूतव्याप्तिप्रकारकधूमत्वावच्छिन्नविशेष्यकं ज्ञान
उपाध्यते जन्यते। तेन तादृशविशेषणतावच्छेदकप्रकारकज्ञानेन परामर्शजन्यताइत्यर्थः। न चैवं तेन परामर्शस्य जननादिति ग्रंथासंगतिः तत्र परामर्श
पदस्य व्याप्याभिन्नहेतुमद् ज्ञेदबोधपरत्वादित्याहुः। शुद्धहेतुतावच्छेदकावच्छिन्ने पक्षधर्मत्वाकांक्षायां तत्र पक्षधर्मत्वमात्रं तात्पर्यकं। व्याप्यधर्मकपदाघटितमेवोपन

यद्वाक्यं प्रयुज्यत इति प्राचीनमतानि प्रयकमिदं तन्मतं दीधितिकृता तन्मतानि प्रायेणैव उदाहरणोपनययोरेव तत्पर्यवस्यतीत्यत्र उदाहरणं तन्नावेणैव परस्प
रप्रयोजकत्वपर्यवसानमुक्तं न तूपनयमात्रस्येत्यपि वदंति ॥ अत्र परामर्शप्रयोजकत्वेन न्यायज्ञानस्य लक्षणघटकत्वे स्वयमनुपपत्तेर्वक्ष्यमाणतया ज्ञा
ब्दज्ञानपदं प्रतिज्ञादिपदप्रतिपाद्यतत्तद्विशिष्टार्थज्ञानपंचकपरं जनकत्वं वाक्यपदं च प्रत्येकं तज्जनकबोधजनकवाक्यपंचकपरं अतः प्रतिज्ञादिवाक्यपंचकत्वा
नः प्रयोजकांतं बोध्यविशेषणं परिचायकमात्रं यद्यप्येवं प्रतिज्ञादिपंचवाक्यैरेकज्ञानजननेन नातिव्याप्तिलक्षणानिर्वाहः न चापि प्रतिज्ञादिजन्यबोधनांप
रामर्शप्रयोजकतालाभायैवसंनवानीप्रायेण नावदर्थविषयकमेव ज्ञानं परामर्शप्रयोजकत्वेनाभिहितमित्यभिप्रेत्य दीधितिकृत्पर्यवसितन्यायलक्षणमाह ॥ उचितानु
पूर्विकाणि प्रतिज्ञादीनि पंचयच समुदायेन तथा तादृशपंचपर्याप्तसमुदायत्वमितियावत् । पंचपदं निगमनांतानाविशिष्टानि वेश्यं इत्येतावताप्यनतु पंचत्वेनापि तेषां
निवेशः प्रयोजनाभावात् व्युत्क्रमप्रयुक्तप्रतिज्ञादिपंचकेऽतिव्याप्तिवारणाय उचितानुपूर्वीकेति । उचितानुपूर्वी प्रतिज्ञानंतरं हेतुस्तत उदाहरणं उपनयोत्तरं निग न
मनत्वरूपा । ननु किमिदं आनुपूर्विकत्वं न तावत्तादृशानुपूर्व्याश्रयत्वं । दर्शितानुपूर्व्याः निगमन एव निर्याततः नापि तादृशानुपूर्वीघटकत्वीघटकतायाद्व
त्य चत्वात् तद्धीनस्वाविषयकप्रतीतिविषयता तादृशानुपूर्विकत्वं प्रतिज्ञाद्यविषयकप्रतीत्या शब्दनिगमनत्वस्य दीनयीकरणानुपविशिष्टनिगमनत्वेन तादृशप्रती
त्यविषयत्वानुपपत्तेः विशेषवृत्तेर्विशेषणानुयोगिकाभावानभ्युपगमात् । नापि तादृशानुपूर्वीविषयिताव्यापकविषयिताकत्वं शब्दव्यापिनेदं प्रतिज्ञादेर्निष्ठ
याकस्यचिदपि प्रतिज्ञादिव्यक्तेः विषयताया तादृशानुपूर्वीविषयतासामान्यव्यापकत्वासंभवात् प्रतिज्ञादिवाक्यं तरघटितन्यायविषयकज्ञानेऽपि

यत्किंचिदानुपूर्वीविषयताव्यापकत्वं च व्याप्यव्यापकभावसंबंधेन तादृशानुपूर्वीविषयताविशिष्टत्वं परिष्कारेण यत्किंचिदित्यनेन नतादृविषयताया ग्रहणशंकानवकाशः तादृशानुपूर्वीविषयकव्युत्क्रमप्रतिज्ञादिविषयकसमु
दायत्वं ग्रहीत्वा व्युत्क्रमप्रतिज्ञादिपंचके ऽतिव्याप्तिमाशंकते॥

२ तादृशानुपूर्वीविषयतासत्वात्॥ यत्किंचिदानुपूर्वीविषयताव्यापकत्वस्य व्युत्क्रमप्रतिज्ञादिविषयित्वसाधारणत्वात्तादृशप्रतिज्ञादिविषयकज्ञानीयतत्तदानु
पूर्वीविषयताया एव तादृशप्रतिज्ञादिविषयताव्याप्यत्वात्॥ नच ज्ञानभेदेन विषयताभेदान्नव्युत्पन्नमते नैवाभेदे वाच्ये तादृशप्रतिज्ञादिव्यक्तेः समाना

तादृशप्रतिज्ञादिसमानाधिकरणोक्तन्यायैः इति बाधमादाय मित्यापत्ति संकेते व्युत्क्रमप्रयुक्तप्रतिज्ञादिपंचके

धिकरणत्वादिना ज्ञानपूर्वीविशेषावच्छिन्नव्याप्यविषयकज्ञानीयानुपूर्वीविशेषविषयतायास्तादृशप्रतिज्ञादिव्यक्तिविषयतानुव्यावृत्तितया स्यास
व्याप्यत्वानपायात्॥ अथवानिगमनपूर्वोपनयपूर्वोदाहरणपूर्वहेतुपूर्वत्वरूपानुपूर्व्याश्रयत्वेन प्रतिज्ञादीनां॥ तादृशोदाहरणपूर्वत्वस्य निप्रतिज्ञोत्तर
त्वरूपानुपूर्व्याश्रयत्वे न हेत्ववयवादीनां निवेशेनानुपपत्तिः॥ अथवा तादृशैकविधानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वमेव तादृशानुपू
र्वीघटकत्वमिति चेन्न। एवमप्येकैकन्यायघटकप्रतिज्ञैकैकवाक्येन समुदायेऽतिप्रसंगो दुर्वार एवेति मैवं स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वस्व
न्यहेत्वादिवृत्तियत्समुदायत्वं तदन्यत्वस्य समुदायविशेषणत्वे तात्पर्यात्॥ व्युत्क्रमप्रयुक्तप्रतिज्ञादिनिष्ठस्य नानान्यायांतर्गतप्रतिज्ञादिपंचकनिष्ठस्य च
समुदायत्वस्य तत्तदन्यत्वविरहान्नातिप्रसंगः॥ एवं च घटमानयेत्यादिवाक्यवृत्तिसमुदायत्ववारणाय प्रतिज्ञादिवृत्तित्वविशेषणमपि सार्थकमित्यवधेयं प्र
तिज्ञादिवृत्तित्वं च प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकधर्मपंचकव्यापकत्वं॥ अतः प्रतिज्ञादिपंचकैकदेशसमुदाये नातिप्रसंगः॥ प्रतिज्ञात्वादेर्व्यासज्यवृत्तित्वानदवच्छ
येकदेशमात्रवृत्तेस्तत्पर्याप्त्यनवच्छेदकत्वात्॥ समुदायत्वं चानेकपर्याप्तिकधर्मस्तस्य च पर्याप्तिसंबंधेन व्यापकपदप्रवृत्तिनिमित्तत्वान्नैकदेशेऽन्यापप्र

एवं चैकस्युत्क्रमघटितानुपूर्वीकत्वस्य तादृशसमुदा
यत्वस्य स्वरूपस्य समुदायत्वविशेषणत्वे तात्पर्यं

यावद्दारप्रसंगइति विभावनीयं। ननु प्रतिज्ञादिलक्षणे न्यायांतर्गतत्वविशेषणस्य प्रवेशनीयतया ऽन्योन्याश्रयप्रसंगइत्यत आह प्रतिज्ञात्वादिकमिति उद
सीनवाक्यवारकेति। न्यायांतर्गतवाक्यवारणमात्रप्रयोजनकेत्यर्थः। एतेन न्यायानंतर्गतप्रतिज्ञादिपंचकसमुदाये उचितानुपूर्वीकत्वविरहादेन न्या
यत्वाप्रसक्ते न्यायघटकप्रतिज्ञादिशरीरे न्यायत्वविशेषणानुपादानेपि न क्षतिरिति सूचितं। क्रमप्रयुक्तविभिन्नपक्षसाध्य इत्युक्तप्रतिज्ञादिपंचकेऽ
तिव्याप्तिशंकां निरस्यति। साध्यादीति। तत्साध्यपक्षकहेतुकन्यायलक्षणे तत्साध्यपक्षकप्रतिज्ञा तत्साधनकहेतु तत्साध्यसाधनकोदाहरण तत्सा
नि ध्यपक्षसाधनकउपनय तत्साध्यसाधनकनिगमनानि वेशनीयानीत्यर्थः॥ नन्वेवं न्यायपदार्थस्याननुगततया न्यायपदस्य नानार्थतापत्तिरि
ति अत्रेष्टापत्तिमाहुर्व्याप्त्यादेरिति। व्याप्त्यादिपदार्थस्येत्यर्थः। साध्यत्वननुगमात् स्वघटकसाध्यादीनां भिन्नरूपेण निवेशनीयत्वात् अननुगमः
या अनुगतप्रवृत्तिनिमित्तविरहः न्यायेऽन्यायपदार्थस्य आदिना अवयवपरिग्रहः। इष्टत एवेति। गत्यंतराभावादिति भावः। म चाननुगतमुक्तस्वरसासिद्ध
वाक्यपंचकजन्यमहावाक्यार्थबोधमादाय लक्षणसमन्वयं निराचिकीर्षुः वाक्यपंचकस्याविशिष्टार्थबोधकतां खंडयति। प्रतिज्ञाभिगमनयोरि
ग्रे ति॥ न संभूयैकार्थप्रतिपादकत्वमित्युक्तेनान्वयः। प्रतिज्ञार्थेऽबाह्निमानिव व्रतिनिगमनार्थस्य विशिष्टहेतुज्ञानज्ञाप्यसाध्यवत्वस्या न्ययोपगमे साध्यव
त्वांशमादाय पौनरुक्त्यप्रसंगात् दंडवान् दंडवानित्यादौ विधेयांशेऽधिकावगाहिनानादृसान्वयबोधस्यसंभवेपि शुद्धपक्षतावच्छेदकावीशिष्टेऽबा
३ नौ तद्धर्मपर्याप्त्यवच्छेदकताकप्रकारताकविशिष्टप्रतावच्छेदकतासंबंधेन शाब्दबोधं प्रति तद्धर्माभेदः कारणं। अतः दं) ४ वीशिष्टेऽभित्युक्ते अबाधितत्वादिविशिष्ट
डवान्नौकदंडवानिति शाब्दबोधः।

दृ, अप्येतानुपूर्विकत्वेन शाब्दादेव समन्वयः॥

गुणानां विधेयानां परार्थत्वात् उद्देश्यानि एव विषयतानिरूपितविषयतान्वयित्वात् समत्वात् तुल्यत्वेन प्रतीयमानत्वात् संबंधः परस्परावच्छेद्यावच्छेदकत्वापन्नविषयतानिरूपकत्वाभावः एवं च विधेयभेदे अवच्छेद्यावच्छेदकत्वापन्नविषयता
कबोधजनकवाक्यतास्वरूपैकवाक्यत्वं न संभवतीति यत्र योर्वाक्ययोरेकवाक्यत्वमपेक्षितं तदर्थयोस्तद्वाक्यजन्यशाब्दबोधनिरूपितपरस्परावच्छेद्यावच्छेदकत्वापन्नविषयतानिरूपकत्वमपेक्षितं भवति॥

हेतुज्ञान ज्ञाप्य धितत्वादिविशिष्टसाध्यवत्त्वप्रमा हि न्यायप्रतीतेरेव प्रयोगित्वेन साध्यादिविशिष्टपक्षतादृशान्वयबोधस्य प्रयोजकस्यानाकांक्षिततया वादितात्पर्यविषयत्वाच्च। यत्तु
वह्निविशिष्टपर्वतोद्देश्यकबोधे वह्निमत्पदानन्तरं पर्वतपदोपस्थितिरपेक्षिता नीलो घटः सुंदर इत्यादाविव घटो नीलः सुंदर इत्यादौ नीलान्वितघटाद्युद्देशे विधे
४ यत्वात् उद्देश्यतावच्छेदकवाचकपदस्योद्देश्यवाचकपदपूर्ववृत्तितायाः अपेक्षणीयत्वात् अतो नैतादृशान्वयबोधसंभवः। न च शुद्धपर्वतत्वावच्छिन्न
म+ न्न एव शुद्धवह्नि~~व्याप्यवह्नि~~निगमनोपस्थाप्यविशिष्टवह्निमत्वप्रापणपद्विधेयतयान्वयोपगमे नैकवाक्यनिर्वाह इति वाच्यं गुणानां च परार्थत्वात् संबंधः त्वं
समत्वात्स्यादिति न्यायेन विधेयतमानां समानयोः शुद्धवह्निमत्वविशिष्टवह्निमत्वयोरवच्छेद्यावच्छेदकत्वापन्नविषयताकत्वरूपसंबंधाभावे नैकवा
क्यतानिर्वाहात् अत एव विधेयभेदे सर्वत्र वाक्यभेदः केवलोपनयजन्यबोधे पक्षे साध्यव्याप्यहेतुमत्वस्य विधेयत्वमुपनयनिगमनाधीनबोधे उद्देश्य
पदपूर्वनिर्देश्यव्याप्यवत्वस्योद्देश्यतावच्छेदकतया वक्तानेन तद्विषयकत्वानिगमनाबोधविषयकत्वयोरवच्छेद्यावच्छेदकत्वावानुदयैकवाक्यतयोपनययोः सत्त्वे
नवसत्वे पक्षेति॥ तन्न॥ तत्तात्पर्ययोजनयापि तादृशबोधसंभवात्॥ उद्देश्यवाचकपदस्य विधेयवाचकपूर्वत्वेन प्रतिसंधानस्यापेक्षणीयतया योजनयैवो
पनयेन पक्षे वह्निप्रसिद्धेः साध्यव्याप्यबोधनात् तत्समर्थसिद्धिवादिवाक्ययोजनायाः दूषणानवगाहित्वात् प्रकृते तात्पर्यानावात् न तत्र चेति चेन्नहि
तात्पर्यविरहादेव न तादृशबोध इत्येवास्तु तात्पर्यविरहस्यैव तत्र बीजत्वात् इदमुपेत्य लक्षणम् उपनयेनापि समं प्रतिज्ञायाः निविहै कार्यप्रतिपा गा॥टि अ
४

x अप्राप्तानां च उद्देश्यघटकत्वं

दकत्वं॥ वह्निमान् पर्वत उपनयार्थस्य साध्यव्याप्यहेतुमत्त्वस्याप्राप्ततया तद्घटितत्वं सङ्घटितं तथाविधेयांशसंभवेऽपि अनुमित्युपयोगिनः पक्षतावच्छेद
कविशिष्टहेतुमत्त्वस्यांशस्यैवोपनयप्रतिपादनार्थं नां काङ्क्षितस्य पर्वते पर्वताभेदबोधस्य तात्पर्यविषयत्वात्। उदाहरणावयवार्थतत्त्वयोरिति। उदाहर
णघटकयोर्यत्तदोर्मध्ये यावत्पिनैकविशिष्टार्थबोधकत्वं। तच्च द्विरुक्तयत्पदेन महानससत्त्वमहानससाम्यत्वादीनां देश्योपस्थापकत्वात्। तत्पदेन तद्रूपावच्छिन्न
परामर्शः महानसं धूमवद्वह्निमच्चेति महानससाम्यवद्धूमवद्वह्निमच्चेति वाक्यार्थश्च तदृष्टिविषयकसमूहालम्बनस्यैवोदयात्। न च वीप्सायां व्यापकत्वबो
धनात् धूमवान् धूमव्यापकवह्निमानित्याकारकैकविशिष्टार्थबोधएव तत्र तात्पर्यमस्तु इति वाच्यं यो यः इत्यादेरनन्वितार्थत्वप्रसंगात्। न च वह्निरूपकयत्पद
स्येव व्यापकत्वमर्थः। स च साध्यांशेऽन्वेतीति वाच्यं। तमादायपारक्येनान्वयबोधस्याप्युत्पन्नत्वात्। व्यापकत्वावच्छिन्नतदर्थस्याभेदेनान्वय इत्यपि न संभवति सु
दरो दण्डीत्यादौ दण्डे सुन्दराभेदेनान्वयवत् एकविभक्तिकत्वाभावेन मत्वर्थीयप्रत्ययस्य पदार्थैकदेशसमस्तनामार्थाद्भेदान्वयस्यासंभवात्। अभेदान्वय
प्रतियोगी साध्यपक्षतया सामर्थ्ये साध्यवाचकपदोत्तरं तद्धितासंभवात्। तत्पदस्य नावतापि सार्थक्यासंभवाच्च॥ तस्माद्यत्पदार्थेऽहेतुस्तत्पदार्थे च तस्मि
न् साध्यस्य विधेयतया ज्ञानमेव समूहालम्बनरूपं तत्र जायते तदुत्तरं व्यापकताबोधोऽमानस एव शाब्दबोधः साध्यवाचकपदस्य प्रकृतसाधनव्यापक
ताविशिष्टसाध्ये लाक्षणिकतया तत्पदार्थे व्यापकताविशिष्टसाध्यवत्तामवगाहते इत्युपेयं॥ वीप्सासमभिव्याहारस्थले व्यापकत्वलाभस्य यत्स्यानादि तथा

समर्थः पदविधिः सूत्रं पदसंबद्धो विधिः नद्धनादिकार्यं समर्थाश्रितमेव न त्वसमर्थमाश्रयति। असामर्थ्यं च समासाघटकपदार्थान्वितस्वार्थबोधकत्वं। इदं स्वरवीप्साविरहस्थले इति चेत्तत्पदस्य

तादृशलक्षणाया निरूढलक्षणत्वेन नादेवाक्ये तत्स्वीकारे क्षतिविरहात्। न च व्यापकत्वबोधयावश्यकत्वेन नाहेत्वाधिकरणे वन्ह्यादिमत्त्वबोधनस्याप्रयो-
जनकतया धूमादिकमुद्देश्यतावच्छेदकीकृत्य समुद्रालेव नानात्मक एव व्यापकताविशिष्टसाध्यबोधोऽपि उपेक्षणीयता। यत्पदेन तादृशलक्षणानङ्ग्या-
चर्नीत्पर्यग्राहकमेवास्त्विति वाच्यं। अर्थबोधकत्वसंभवे तत्परित्यागायोगात्। यो यो न वह्निमान् स न धूमवानित्यादौ चावतिरेकोदाहरणे वह्निम-
देदादिहेतुके तादृशान्वयमुदाहरणे वायत्तदर्थविविक्षायां प्रतियोगिवाचकपदसमानविभक्तिकपदोपस्थाप्यास्याप्यनुयोगिनो प्रवेशनान्योन्याभावबो-
धस्य संभवात्। एवं चैत्रो जानातिकर्तृत्वादित्यादौ न्यायानरमतेऽपि करोति सजानातीइत्युदाहरणे यत्तत्पदार्थादिविवक्षायां धर्मिणोऽनेन हेतुसाध्याश्रयविक-
लतया उदाहरणानामसत्ताप्रसंगश्चेति। एवं चोदाहरणहेतुवाक्ययोः धूमवान् धूमवह्निमानित्येतादृशविशिष्टबोधजनकत्वसंभवात् उदाहरणावयवांत-
रयोरित्यनुपपन्नमित्यपि निरस्तं। आगमेन। सुतरामेव। न संक्षेपैकार्थप्रतिपादकत्वमित्यनुपज्यते। प्रतिज्ञाहेत्वादित्यन्यापिनकारं विहाय नान्यापवृत्ति
धूमज्ञानज्ञाप्यवान्हिमानित्येतादृशविशिष्टज्ञानजनना दितिभावः। अथ प्रतिज्ञाजन्यबोधानंतरं कुत इति साध्यज्ञापकाकांक्षानामानिवर्तकहेतु
वाक्यमप्रयुज्यते। तान्निवर्तकतया च पक्षविशेषणतानापन्नसाध्यांशे हेतुज्ञानज्ञाप्यत्वबोधे नापि निर्वर्तितिपर्वतांशे हेतुज्ञाप्यत्वविशिष्टसाध्यवैशिष्ट्यावगा-
हिबोधस्यानुपयोगीतया प्रतिज्ञातात्पर्यविषयत्वमितिचेन्न। पर्वते वह्निबोधानंतरं पर्वतेयद्वह्निज्ञापकं तच्चेत्याकांक्षाजायते तन्निवर्तिः साध्ये धूमादिज्ञान

५ (left margin) वीथैतुसंबंधानं ... (vertical marginal note, partly illegible)

(right margin) गतकाणे, साध्यकसंबंधतावच्छेदकीभूतः तु ज्ञानं

५

जन्यपर्वतविशेष्यकज्ञानविषयत्वप्रतिपादनेनैव। धूमाद्वह्निमन्महानसमित्यादिवाक्यस्य पर्वतो वह्निमानित्याकांक्षानिवर्तकत्वाभावात्। पंचमीतत्परतादृश
पर्वतविशेष्यकज्ञानविषयत्वज्ञानं च तादृशेषणतापन्नसाध्यांश एव उक्तवाक्यान्महानसादिविशेषणतयोपस्थितेन प्रतीतेरेकधर्मिविशेषणतापन्नोऽन्य
विशेष्यकहेतुविशेषणज्ञानाधीनज्ञानविषयत्वाबोधकतापा पंचम्या अव्युत्पन्नत्वादिति। धूमाद्वह्निमान्पर्वत इत्यादि विशिष्टवैशिष्ट्यवैशिष्ट्यावगाहिबोध
स्यावश्यकत्वा। कथमिति। निगमने अयं पदार्थानुषंगपक्षे वह्निव्याप्यधूमवान्पर्वतादिरूपोपनयार्थे निगमनार्थे धूमज्ञानज्ञाप्यवह्निमत्त्वाद्यन्वय
ना। संभवादिति भावः। अनुषंगपक्षे तु तादृशवह्न्यादिमत्पर्वतरूपनिगमनार्थमोऽत्र बोधनेनैवाकांक्षानिवृत्तेरुपनयार्थविशिष्टपक्षे निगमनार्थान्वित विशेषणबो
धस्यानपेक्षितत्वात् अर्थविषयतेति कथाचिदित्युक्तं। इदमवधेयं। अनुषंगपक्षे उपनयैकदेशार्थपदार्थपदार्थे निगमनार्थान्वयमात्रेणैव कृतकृत्यतया
तत्समुदायार्थविशिष्टपक्षे निगमनार्थविधेयकबोधोऽपि नात्यर्थमप्रामाणिकमिति। नन्वेवं प्रतिज्ञादीनां पंचानां कथमेकवाक्यतासम्बद्धा इत्यत आह॥
एकेति। विशिष्टेति। विशिष्टैकार्थप्रतीतीच्छाप्रयोज्यत्वमात्रेणेत्यर्थः। मात्रपदेन तादृशप्रतीतिजनकत्वव्यवच्छेदः। तादृशप्रतीतिः निगमनरूपचरम
वाक्यार्थबुद्धिरूढीच्या वा समानसः परामर्शः तत्स्मरणाच्च तत्प्रजनयत्नोऽपि इतरेतरवाक्यप्रयोजिकामाकांक्षामुत्थापयतः प्रतिज्ञादेरिह धूम इत्यादिव
चसा ज्ञानुमानिकवह्न्यादिधीपरताबाने वह्निमसेवा ननु मा वह्निरवयवैः समभ्येकमहावाक्यार्थबुद्धेरजननेऽपि परामर्शप्रयोजकीभूतत्वीयतत्तद्विशिष्टा नू
र्थबोधजनकतापाः सर्वविषयवर्त्त्वेनसत्वेन निरुक्तलक्षणसमन्वयो नानुपपन्न इत्यत आह। परामर्शप्रयोजकत्वं चेति। परामर्शप्रयोजकज्ञानजनकत्वे च
निगमने तादृशप्रतीतिजनकत्वंसत्त्वेन न तद्व्यवच्छेद इत्यत आह उद्देश्य इति॥

६ श्री त्यर्थः। तद्विषयेति॥ परामर्शविषयेत्यर्थः। तत्पदार्थोपस्थापकेति। अभेदे तृतीया। तच्चाच तदुपस्थापकत्वरूपमित्यर्थः। विवक्षितामिति शेषः। तथा च यादृशवाक्यैः
परामर्शविषयाः सकलपदार्थाः उपस्थाप्यन्ते तावत्समुदायत्वं मादृशि विवक्षितमिति पर्यवसितोऽर्थः। उदाहरणोपनययोरेवेति। उपनयस्य व्याप्यबोधकत्वमता
भिप्रायेणैवोदाहरणान्तर्भावः। ततः समुदायत्वं पर्यवस्यतीति। तावत्यामेव परामर्शविषयसकलपदार्थोपस्थापनादिति भावः। अच मन्दिं परामर्शानुकूल
त्वं यादृशयादृशवाक्यानां तादृशवाक्यसमुदायत्वं विवक्षितमतो नोदाहरणोपनयमात्रातिव्याप्तिरित्याशंकते॥ अथेति। तदनुकूलतामात्रेणेति। पूर्ववदत्रैव तृतीया
परामर्शप्रयोजकत्वमित्यनुषज्यते। इत्यादिइत्यादिसमुदायस्य तथात्वं। न्यायत्वं स्यादिति शेषः। कावह्निमानित्यादिवाक्यानामपि जिज्ञासाज्ञानद्वारा परम्परया
वप्रयोजकत्वेन कथंचित्परामर्शानुकूलतासंभवादिति भावः। इत्यादिइत्यादिपदात् व्युत्क्रमप्रयुक्तप्रतिज्ञादावतिव्याप्त्यादेः परिग्रहः। इति न्यायत्वद
णं॥श्री॥ मूले काऽवयवत्वे शाब्दज्ञानस्यानुमितिचरमकारणलिंगपरामर्शप्रयोजकशाब्दज्ञानजनकत्वाभिधानप्रतिज्ञादिपदप्रतिपाद्यपंचवाक्या
नामेकवाक्यार्थधीजनकत्वाभिमतेन प्रतिज्ञादिपदप्रतिपाद्यतत्तद्विशिष्टार्थगोचरशाब्दधीविशेषणं। परिचयायैव तेषां निवेशः। विशिष्य तत्तदर्थवि
षयकशाब्दबुद्धित्वेन न तु तादृशशाब्दधीजनकत्वेन तु च्चासत्यैककावयवजन्यशाब्दबुद्धेरपि परामर्शप्रयोजकतया तज्जनकावान्तरवाक्यार्थज्ञानजन
कावयवायव्याप्तिप्रसंगस्य दुर्वारत्वात्। न च साध्यविशिष्टपक्षादिविषयकशाब्दबुद्धित्वेन बोधपंचकनिवेशः। तन्निगमनाजनकत्वेन तस्य बोधजनकत्व
गमत्वादिरूपानुगतधर्मावच्छिन्नपरत्वात्। न चैवं सति न्यायांतर्गतपर्वतो वह्निमानित्यादिवाक्येऽतिव्याप्तिः। वाक्यपदस्य न्यायांतर्गतत्वार्थकत्वा ६

यद्यपीत्यस्य तात्पर्यं प्रतिज्ञादिलक्षणे न्यायान्तर्गतत्वनिवेशेनोदासीनेऽतिव्याप्तिः अनिवेशे साध्यवत्पक्षादिबोधजनकवाक्यत्वं प्रतिज्ञालक्षणं दृष्टान्ते चोदासीनेऽतिव्याप्तिरतः अवयवलक्षणेन तन्निवेशः

दित्यादिग्रन्थपर्यालोचितलक्षणार्थमाह । न्यायेति ॥ यद्यप्युदासीने न्यायान्तर्गतत्वाघटितप्रतिज्ञाद्यन्यतमत्वमेव नास्ति ॥ तदघटितप्रतिज्ञाद्युपादानाभिप्रायेणेदं । अथ
किमिदं न्यायान्तर्गतत्वं । न तावत्स्वाविषयकप्रतीत्यविषयन्यायकत्वं प्रतिज्ञाविषयकप्रतीत्या हेत्वादिरूपन्यायैकदेशस्य विषयीकरणात् । तद्घटितसमुदायात्मक
न्याये प्रतिज्ञाद्यविषयकप्रतीत्यविषयकत्वस्य दुर्ग्रहत्वात् । एकदेशवृत्तेर्व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावानङ्गीकारात् ॥ नापि न्यायत्वविषयिताव्यापकवि
षयितात्मकत्वं ॥ उच्चारणक्रमेणैवानुपूर्व्यवच्छिन्नवाक्यानामपि नैदात्म्यस्यात्रौदापि प्रतिज्ञादिवाक्ये विषयताया एकविधत्वमपि न्यायमवगाहमाने प्रत्यक्षे प्रतिज्ञा
नेष्वपूर्वसंभवात् । मैवं ॥ स्वाविषयकप्रतीत्यविषयन्यायकत्वमेव तत् । न्यायत्वसामानाधिकरण्यमात्रेण तादृशप्रतीत्यविषयत्वविवक्षणीयम् । एकैकप्रतिज्ञादि
वाक्यविषयकप्रतीत्यान्यतरघटितन्यायस्य तन्न्यायैकदेशहेत्वादेश्चावगाहमानेऽपि न्यायत्वाधिकरणे तत्प्रतिज्ञावृत्तौ तत्प्रतिज्ञादिव्यक्तिविषयकप्र
तीत्यविषयत्वसत्त्वेन तत्सांतत्याव्यवगाहनमेव । अथ वा न्यायत्वाश्रयत्वमेव तत्रापर्याप्तिविवक्षया एकदेशस्यापि तत्त्वानुपपत्तेः । वस्तुतो न्यूनत्वघटकस्य स
मुदायत्वांशस्याचरितप्रयोजनकत्वेनानिवेशात् । उचितानुपूर्विकत्वमात्रं विवक्षितं ॥ तदेवं न्यायान्तर्गतत्वमेकदेशसाधारणं । उचितानुपूर्विकत्वं प्रतिज्ञान्तरहेत्वादि
घटितवाक्यपञ्चकानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वं विशिष्टधर्मावच्छिन्नप्रतियोगितावच्छेदकतायास्तद्घटकसमुदायपर्याप्ततया एकदेश
स्यापि तदाश्रयतया प्रतिज्ञादेस्तद्वत्त्वमक्षतं ॥ उपनयोत्तरत्वविशिष्टनिगमनत्वशरीरे वैशिष्ट्यघटकतया निगमनस्यान्तर्भावात् तत्साधारणत्वमक्षतमेवोक्तधर्म

मैकिं इत्यत्र विषयतानामग्रे चाकज्ञानुपूर्वीविषयताविलक्षणानिगमनादिपूर्वपूर्वत्वरूपानुपूर्वीविषयता बोध्या।

स्या। विशिष्टस्यावछेदकतास्थले एकमवछेदकं। अपरंच तद्विशेषणं। तन्निष्ठावछेदकत्वस्यावछेदकं नतु समुदायेऽवछेदकत्वं पर्याप्तमित्युपगमेचैतादृशानुपूर्वी
विशेषप्रकारकनिश्चयत्वसमनियतकारणतावछेदकविषयताकत्वं। विवक्षणीयं। तादृशीच तादृशानुपूर्वीविशिष्टवैशिष्ट्यबुद्धित्वावछिन्नकार्यता
निरूपितकारणतावछेदकत्वं नहेत्वादिनिष्ठानां तत्तत्प्रकारतापन्नप्रतिज्ञादिविषयतानामप्यव्याहतं। विनिगमनाविरहादितरविषयतानिरूपित
त्वेन निश्चयत्वविशिष्टत्वेनच कारणीभूतज्ञानविषयसकलनिरूपितविषयितानां कारणतावछेदकत्वात्प्रतिज्ञोत्तरहेत्वादिविशिष्टवैशिष्ट्य
बुद्धित्वावछिन्ननिरूपितां प्रतिज्ञोत्तरहेत्वित्यादिज्ञानसाधारणकारणतां तादृशानुपूर्व्यवछिन्नाभिन्नवाक्यत्वावछिन्नवैशिष्ट्यावगाहिबुद्धित्वा
वछिन्ननिरूपितां तादृशवाक्यत्वादिप्रकारकज्ञानकारणतांचादायोदासीनातिप्रसंगवारणाय कारणतायां तादृशधर्मव्याप्यत्वव्यापकत्वयोर्नि
वेशनं। नच तादृशानुपूर्वीविशेषावछिन्नवैशिष्ट्यावगाहिबुद्धित्वावछिन्ननिरूपितकारणतायां ज्ञापितनतादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वसमनै
यत्यसंभवः। प्रतिज्ञात्वादिनापदार्थांतरावगाहितादृशानुपूर्वीप्रकारकज्ञानसमानाकारकज्ञानसाधारणत्वात्। तादृशज्ञानस्य वास्तवप्रतिज्ञादिवि
षयकत्वेन तत्तद्घटितानुपूर्वीप्रकारकत्वाक्षतावादितिवाच्यं प्रतिज्ञात्वावछिन्नप्रकारतानिरूपितनिक्रमेणानिगमनत्वावछिन्नविषयतापर्यंतं निवेश्यत
छ्वात्तिनिश्चयत्वसमनैयत्यस्यैवविवक्षितत्वात् तादृशनिश्चयत्वस्योक्तज्ञानसाधारण्येन क्षतिविरहात्। नचैवं उदासीनप्रतिज्ञाद्यानंतर्यहेत्वाद्यंशेऽवगाह

तेयोश्चामस्तान्निष्ठतादृशप्रतिज्ञादिविषयितायाअपिनिरुक्तकारणतावच्छेदकतयाऽतिप्रसंगो दुर्वारइतिवाच्यंसमावृत्तिविषयतायाएवन्निवेशनीयत्वादिति
कृतंविस्तरेण। अवयवैकदेशस्यावयवद्वयात्मकसमुदायस्य चवारणायप्रतिज्ञाद्यन्यतमत्वमिति। अथधूमादालोकवान्पर्वतोवह्निमान्धूमादित्यादिन्या
यांतर्गतप्रतिज्ञाद्येकदेशेधूमादित्यादिभागेऽतिव्याप्तिस्तस्यापिहेतुप्रतिपाद्योयादृशविशिष्टार्थः तन्मात्रबोधकत्वेनहेतुलक्षणाक्रांततया प्रतिज्ञाद्यन्यतम
त्वाक्रांतत्वात्। नचतद्घटकपंचम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्वेनहेतुलक्षणाक्रांतत्वेऽपि तस्येतिवाच्यं। एवमपिधूमाद्वह्निमतः सधर्मपर्वतोवह्निमानि
त्यादिप्रतिज्ञाघटकतादृशभागेऽतिप्रसंगस्यदुर्वारत्वादितिचेन्न। प्रकृतपक्षतावच्छेदकावच्छिन्नविशेषणतापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नान्वितस्वा
र्थबोधकहेतुविभक्तिघटितत्वेसतिप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वाविषयताबहिर्भूतविषयताशून्यबोधजनकवाक्यत्वरूपहेतुत्वस्यैवनि
वेशनीयतयानातिप्रसंगात्। निगमनघटकस्यतस्मादितिभागस्यवारणायविशेष्यदलं। नजन्यबोधेतादृशविषयताबहिर्भूतव्याप्त्यादिविषयतासत्वे
नतद्वारणात्। ननुएकदेशवृत्तितयाअपिदुर्वारत्वात्। अत्रचप्रतिज्ञादिभिन्नभेदानुयोगितावच्छेदकरूपवत्वंतत्। तादृशंचरूपंप्रतिज्ञात्वादिकमेव। नतु
देकदेशपर्याप्तपर्वतपदत्वादिकं। तदवच्छिन्नेव्यासज्यवृत्तिप्रतिज्ञात्वावच्छिन्नभेदसत्वादितिचेन्न। प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्वात्तादृशभेदावच्छिन्नभेदस्यप्रतिज्ञा
त्वाद्यवच्छिन्नेऽपिसत्वासंभवात्। प्रतिज्ञात्वपर्याप्त्यधिकरणस्यसमुदायस्यैकदेशानतिरिक्तत्वात्। नहिव्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकएकदेशभेदः प्रमा
पे२
प्रतिज्ञाद्यन्यतमत्वंप्रतिज्ञादिभिन्नभिन्नत्वरूपंप्रतिज्ञाद्येकदेशसाधारणमपिभेदस्यव्यासज्यवृत्तितयासमुदायवृत्तित्वx

पिकः। घटपटैन घट इत्यादिप्रतीतेरप्रसिद्धेः। प्रतिज्ञादिकोदपंचकानुयोगितावच्छेदकं यत्समुदायत्वावच्छिन्नानुयोगिकत्वं प्रतियोगितावच्छेदकधर्मवत्त्वविवक्ष
णे प्रतिज्ञाहेत्वादिसमुदायेऽतिव्याप्तिस्तादृशसमुदायत्वावच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्त्वात्। नातादृशसमुदायत्वस्यानिरुक्तरूपान्तर्गतित्वेन तादृशसकलं
* तावच्छेदकप्रतियोगि ता धर्मावच्छिन्नानुयोगितावच्छेदकत्वेन प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकत्वे प्रतियोगितावच्छेदकयद्यत्तदवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छे
धर्मस्य दकतेनापि तादृशविशेषणेऽतिगौरवमतो लघुलक्षणान्तरमाह। प्रतिप्रतिज्ञाद्यघटकेति। अस्यापि व्याप्यतागतिः स्तनीत्यनुपयुज्यते। अतो न्यायबहिर्भूतत्वे
भूतवाक्यसमुदायस्य प्रत्येकदेशवारणाय प्रमेयघटकत्वानिवेशनीयं। यच्च तावद्वर्णसमुदायरूपप्रतिज्ञादिघटकतावद्वर्णान्तर्भेदः प्रतिज्ञोदयघटः एक
देशभेदस्य समुदायेऽनन्वयप्रमेये नैवेतल्लक्षणानुसरणात् न च प्रतिज्ञादिघटकतानवच्छेदकधर्मवत्त्वानिवेशान्न दोषः। प्रतिज्ञात्वादेः प्रतिज्ञाघटकता
नवच्छेदकत्वेन तदादायलक्षणसमन्वयसिद्धिरिति वाच्यं। प्रतिज्ञादेः शरीरे प्रमेयत्वादिनातद्देकदेशस्यानिवेशात्तस्य तद्घटकतानवच्छेदकतया तद्रूपमादाये
त वैकदेशेऽतिव्याप्तेः। न च न्यायान्तर्गतित्वसत्त्वनुषंगेण तादृशरूपस्य न्यायत्वव्याप्यत्वकल्पनान्न प्रमेयत्वादिकमादायदोषइति वाच्यं। तथा सति प्रतिज्ञादिघट
कतावच्छेदकपर्वतपदत्वादीनां न्यायान्तर्गतित्वप्रकारणादिसाधारणतया न्यायत्वाव्याप्यतयैव वारणासम्भवे तदृश रूपव्याप्यत्वेऽ तावतापि तद्वर्णनिष्ठतन्त्रव्यक्ति
त्वादिकमादायाऽतिव्याप्तेर्दुर्वारत्वात्। एतेन वर्णत्वव्याप्यतानिवेशेऽपि प्रमेयत्वादिवारणमपि परास्तं। न च प्रतिज्ञादिघटकतावच्छेदकयद्यद्रूपं तत्तदवच्छिन्नभे
दकूटसमानाधिकरणन्यायत्वव्याप्यधर्मवत्त्वानिवेशेन सामंजस्यं।

श्रीः

तन्नपक्षिकत्वादि नं प्रतिज्ञादिघटकतावच्छेदकतत्तद्वर्णव्यक्तिनिष्ठवर्णत्वव्याप्यजातिविशेषावच्छिन्नभेदकूटासमानाधिकरणत्वाभावच्छेदकूटस्यैकाधिकरणांत्नर्भावे
णप्रतिज्ञात्वादैः सामानाधिकरण्याप्रसिद्धावपि नावच्छेदानां प्रत्येकं सामानाधिकरण्यधर्मविशेषणतया प्रतिज्ञात्वादैः ज्ञानाधिकरणांतर्भावेणतावच्छेदसामाना
धिकरण्यसत्वेनोपपत्तिरिति वाच्यं। एवमपि प्रतिज्ञाघटकवर्णद्वयादिवृत्ति द्वित्वादेर्नैनिन्नाधिकरणांतर्भावेणतावच्छेदसमानाधिकरणतया वर्णद्वयस्यापि
तत्वापत्तेः। नचन्यायघटकतावच्छेदकत्वेन धर्मविशेषणीभूतयानोक्तद्वित्वादिकमादाय नातिप्रसंगः नादृशद्वित्वादिनानातद्वर्णानां न्यायशरीरे निवेशेन तस्य न्याय
घटकतानवच्छेदकत्वादिति वाच्यं। एवं सति प्रतिज्ञाहेत्वादेः समुदायनिष्ठवर्णानां प्रतिज्ञादिपंचकनिष्ठसमुदायत्वरूपन्यायावच्छिन्ने शरीरे प्रतिज्ञात्वा दि

ज्ञसंतव मात्रं क्रम पिच्चइति

द्विनैवं निवेशेनादृशसमुदायत्वस्य न्यायघटकतानवच्छेदकधर्मवत्वमेवसत्यं नार्थः। तद्घटकतावच्छेदकत्वेन स्वावच्छिन्नाविषयकप्रतीतिविषयतानवच्छेदकप्र
तिज्ञादिकत्वं। जन्यो तस्याश्रयाविषयकप्रतीतिअविषयप्रतिज्ञात्वाश्रयकत्वमेव तादृशावच्छेदकावच्छिन्नभेदकूटसामानाधिकरण्यं तादृशावच्छेदकभेदकूटवत्व
मेव वाच्यं धर्मनिवेश्य। प्रतिज्ञाद्यविषयकप्रतीत्यातदेकदेशानरस्यावगाहनेन प्रतिज्ञात्वावच्छिन्नेतदविषयकप्रतीत्यविषयत्वासत्वेऽपि प्रतिज्ञात्वाश्रय[illegible]
मेतत्कदागाविषयकप्रतीत्यविषयत्वसत्वात्कदागवृत्तिधर्मस्य स्वपदेनोपादानसंभवात् प्रतिज्ञादिघटकतावच्छेदकत्वं सुघटं। एवंच एतद्रूपेण प्रतिज्ञादिशरी

दंश

रे तस्य निवेशस्तदेकदेशवृत्तितादृशरूपस्यावच्छेदकप्रतिज्ञादिघटकतावच्छेदकत्वेनावच्छेदकभेदवत्वाभावान्नतद्वत्यतिप्रसंगः अतएवच प्रतिज्ञादिघटकताव
च्छेदकावच्छिन्नभेदकूटसामानाधिकरण्यस्य प्रतिज्ञादिघटकतावच्छेदकभेदकूटवत्वस्य वाधर्मविशेषणत्वे प्रतिज्ञादिहेत्वादिवृत्तिसमुदायत्वस्य सामान्यया।

नं-६३

ना द्वि

१ विषयकप्रतीत्यविषयप्रतिज्ञादिकतया न घटकतावच्छेदकत्वेन तादृशसमुदायत्वाश्रययावद्वर्णत्वान्यूनमत्वादिरूपनिरुक्तप्रतिज्ञादिघटकतावच्छेद
कतत्तद्धर्मावच्छिन्नत्वेदासमानाधिकरणत्वेन च तद्वारणायोपात्तस्य विशेष्यदलस्य वैयर्थ्यप्रसंग इत्याशयः दिप निरुक्तप्रतिज्ञाघटकतावच्छेदकत्वव प्रतिज्ञादि
घटकयावद्वर्णसमुदायवृत्त्यव्यासज्यवृत्त्यन्यूनमत्वाद्यवच्छिन्नत्वेदसामानाधिकरण्यस्य तादृशप्रतिज्ञादिपदस्य च प्रतिज्ञात्वादावसत्वेनासंभव इत्यसंग:
त्वप्रतिज्ञात्वादिपर्याप्त्यधिकरणाविषयकप्रतीतिविषयतावच्छेदकत्वमपि घटकतावच्छेदकशरीरे निवेशनीयं। तादृशप्रतीतिविषयतावच्छेदकत्वं च तद्दृश्य
त्किंचिदेकप्रतीतिविषयतानुन्यावृत्तित्वं तेन प्रतिज्ञादिघटकयावद्वर्णवृत्त्यन्यूनमत्व प्रतिज्ञात्वादिना प्रतिज्ञादिघटककतिपयवर्णविषयाहि प्रतीतिविष
यत्वस्य स्वरूपसंबंधरूपावच्छेदकत्वस्य तादृशान्यूनमत्व प्रतिज्ञात्वादिसाधारण्ये ऽपि न क्षतिः यत्किंचित्प्रतीति निवेशात् प्रतिज्ञाघटकयावद्वर्णविषयप्रत्ये
कं प्रतिज्ञात्वादिपर्याप्त्यधिकरणाविषयकप्रतीतिविषयत्वसत्वेन तादृशविषयतानुन्याप्रसिद्ध्यापि न क्षतिः। एवं च प्रतिज्ञाहेत्वादिवृत्तिसमुदायत्वस्य तादृ
शसमुदायत्वव्यापकान्यूनमस्वत्वस्य च प्रतिज्ञादिघटकतावच्छेदकत्वे प्रतिज्ञात्वादिवत् प्रतिज्ञात्वादिपर्याप्त्यधिकरणविषयकप्रतीतिविषयतानुन्यवृत्तित्वा
दिति समुदायवारकतया विशेष्यदलसार्थक्यमित्युच्यते। तदापि प्रतिज्ञाहेत्वादि उक्तत्रयघटितत्वमुपेक्ष्य तदुक्तत्रयघटकताग्रयाघटितत्वपर्यन्तनिवेशनमनर्थ
कं तावत्पर्यन्तनिवेशनं प्रतिज्ञाहेत्वाद्युक्तत्रयघटककतिपयभागघटितसमुदाये तदेकतरापरकतिपयभागघटितसमुदाये चातिप्रसंगवारणाय तत्र प्रथमसमुदाय
दौ प्रतिज्ञात्वहेतुत्वाद्युक्तत्रयपर्याप्त्यधिकरणाविषयकप्रतीतिविषयमात्रवृत्तित्वेन प्रतिज्ञाहेत्वाद्युक्तत्रयघटकतावच्छेदकत्वात् उत्तरत्र चैकघटकतावच्छेदकत्वात्। १